**Kaumodaki : Journal of Multidisciplinary Studies**
[ A Peer-Reviewed, Open Access Journal; Indexed in NepJOL ]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Committee, Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# अनुवादस्य सैद्धान्तिकस्वरूपम्

**प्रकाशपौडेलः**
Department of Sahitya (Sanskrit Literature), Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History* : *Submitted 25 Aug. 2021; Reviewed 18 Sept. 2021; Revised 19 Oct. 2021***
***Corresponding Author* : *Prakash Paudel, Email* : *prakash.paudel@nsu.edu.np***
***DOI* : *https://doi.org/......***

**सारः**

*यस्यां कस्यामपि स्रोतोभाषायां स्थितानां सामग्रीणां विषयाणां वा तदन्यलक्ष्यभाषासु रूपान्तरणप्रक्रियैवानुवादः । अनुवादसम्बद्धं शास्त्रमनुवादशास्त्रं कथ्यते । विश्वस्मिन् ज्ञेयविषयान् सम्प्रेषयितुम्, ज्ञानस्य विस्ताराय चानुवाद आवश्यकः । अनुवादो विविधाधारेण वर्गीकृतो लभ्यते । तथाऽप्यन्तरभाषिक-भाषान्तरिक-भाषेतरानुवादे हि सर्वेऽपि भेदोपभेदाः सम्मिलिता भवन्ति । अनुवादकार्ये चत्वारि चरणानि भवन्ति । यथा - अनूद्यसङ्कथनपठनम्, तस्य भाषान्तरिकविश्लेषणम्, अनुवादप्रक्रिया अनुवादसङ्घट्टनं वा, लक्ष्यभाषायां सङ्कथननिर्माणञ्चेति । एतेषु चतुर्षु चरणेषु निर्वाहितेष्वनुवादप्रक्रिया पूर्णा भवति । कुशलेनानुवादकेन सर्वदा मध्य आगताः समस्या निराकृत्य स्रोतोभाषायाः सामग्रीणां लक्ष्यभाषाया निकटे स्थापनाय यतनीयं भवति । अतोऽनुवादो रचनायाः पुनःसंरचनं पुनरुत्पादनं वा मन्यते । अस्मिन्नध्ययने प्रमुखतयानुवादस्य प्रकारान्, विधीन्, पद्धतीः, मान्यताश्च पुरस्कृत्य तत्सम्बद्धसैद्धान्तिकपक्षस्य च विवेचना कार्या भवति ।*
***शब्दकुञ्जी :*** *प्रविष्टिः, प्रायोगिकम्, भाषिकसङ्केतः, लक्ष्यभाषा, सङ्कथनम्, स्थानान्तरणम्, स्रोतोभाषा*

## विषयपरिचयः

अनूपसर्गकाद् वद्धातोर्घञि निष्पद्यतेऽनुवादशब्दः । अनुवादे वादशब्दस्य पूर्वं प्रयुक्तोऽनूपसर्गः पश्चादित्यर्थं बोधयति चेत् वादशब्दः कथनमभिव्यञ्जनं वा बोधयति । संस्कृतवाङ्मयग्रन्थेषु प्राचीनकालादधुनापर्यन्तमनुवादशब्दस्य स्थाने अनुवचनम्, अनुवाक्, अनुकथनम्, पश्चात्कथनम्, छाया, टीका, भाषानुवादः, आवृत्तिरित्यादयः शब्दाः प्रयुक्ताः सन्ति । परन्त्वधुना विविधभाषाणां पारस्परिकसम्बन्धो विकसितः । तेनानुवादशब्दस्यार्थे च परिवर्तनमभूत् । अतोऽधुना स शब्दो भाषान्तरणं लिप्यन्तरणं वा बोधयति । अनुवादस्य द्वयोरर्थयोर्मध्ये लिप्यन्तरणापेक्षया भाषान्तरणमेव प्रसिद्धमस्ति । अनुवादसम्बद्धाध्ययनस्य शास्त्रमनुवादविज्ञानमनुवादाध्ययनं वा कथ्यते । आङ्लभाषायामनुवादाध्ययनम् Translation studies इति कथ्यते । आङ्लभाषायां Translation इति शब्दस्यार्थः सामान्यतया स्थानान्तरणमिति भवति तथापि सन्दर्भेऽस्मिन् रूपान्तरणमेवास्य तात्पर्यार्थः । अतः शब्देनैतेनैकस्यां भाषायामभिव्यक्तानां विषयाणां तद्भिन्नभाषायां प्रस्तुतिरभिव्यक्तिर्वा बोध्यते ।

*copyright 2022 © the Author(s) and the Publisher*

अनुवादो भाषासाहित्यादिभिरनेकक्षेत्रैर्विषयैर्वा सम्बद्धो दृश्यते चेदनुवादविज्ञानं प्रयोगपक्षतो भाषाविज्ञानसम्बद्धं भवति । भाषाविज्ञानस्य महत्त्वपूर्णा शाखा प्रायोगिकभाषाविज्ञानमस्ति । तस्य महत्त्वपूर्णा शाखा विद्यतेऽनुवादविज्ञानम् । भाषायाः प्रायोगिकं कार्यं प्रायोगिकभाषाविज्ञाने क्रियते । भाषायाः प्रकार्यपरके प्रयोगपरके वा कार्ये क्षेत्रे च स्वीकृतमनुवा-दविज्ञानं प्रायोगिकभाषाविज्ञानस्यैका शाखा मन्यते । भाषायाः प्रयोगात्मकविषयत्वेनायमनुवादः पद्धतितोऽपि प्रक्रियया सहाधिकतया सम्बद्धो दृश्यते । एतेनानुवादविज्ञानमनुवादाध्ययनं वा अनुवादविधेः प्रक्रियायाः वा अध्ययनस्य शास्त्रमस्तीति स्पष्टं भवति ।

## समस्याकथनमध्ययनस्योद्देश्यञ्च

अनुवादस्य सैद्धान्तिकं स्वरूपं किम् ? इति प्रस्तुताध्ययनस्य समस्यास्ति चेत् तस्य सैद्धान्तिकस्वरूपगवेषणमुद्दे-श्यमस्ति ।

## अध्ययनविधिः

भाषाविज्ञानस्य महत्त्वपूर्णा शाखा प्रायोगिकभाषाविज्ञानमस्ति । अनुवादविज्ञानं तस्याः च महत्त्वपूर्णा शाखा विद्यते । अत्रानुवादविज्ञानस्य सैद्धान्तिकनिरूपणाय पुस्तकालयतः सामग्रीसङ्कलनं कृत्वाध्ययनं कृतमस्ति । तस्मिन्नेवोपक्रमे रोमनयाकोब्सन-जेसीक्याटफोर्ड-युगेननाइडा-पिटरन्युमार्कप्रमुखाणां पाश्चात्यभाषाचिन्तकानां राद्धान्ताः प्राथमिकस्रोतांसि सन्ति । अत्र ते एव सिद्धान्ताः व्याख्याविश्लेषणात्मकविधिना निरूप्य निष्कर्षस्थापनस्य यत्नः कृतोऽस्ति ।

## पूर्वकार्यस्य समीक्षणम्

प्रस्तुतोऽयं लेखोऽनुवादस्य सैद्धान्तिकाध्ययने केन्द्रितोऽस्ति । सैद्धान्तिकमध्ययनं सम्पूर्णमेव पूर्वकार्यं भवति । अनुवादस्य सैद्धान्तिकी चर्चा संस्कृते इतः पूर्वं विहिता न विद्यते । भाषान्तरेषु विहितानां पूर्वकार्याणामुल्लेखः केवलं पिष्टपेषणं भवतीति हेतोः पूर्वकार्यस्य पृथक् समीक्षणं न योजितम् ।

## अनुवादलक्षणम्

अनुवादस्य सैद्धान्तिकपक्षे गवेषणस्य प्रारम्भः प्रथमतो भाषाशास्त्रिभिर्विहितमस्ति । संस्कृतेऽपि अनुवादकार्यं प्राचीनकाले ज्योतिष-वास्तुकला-चिकित्सादिविषयक्षेत्रेषु विहितं स्यात् । (तिवारी, १९७२, पृ. १२) अधुना तादृशमनुवादकार्यं नोपलभ्यते । कालिदासभवभूतिप्रभृतिनाटककाराणां नाटकेषु स्त्रीणां षण्ण-म्लेच्छ-किरात-शकार-कुब्जादीनां राजसदनसेवकानामपि वचनानि प्राकृते निबद्धानि सन्ति । तदनु केचिदंशाः छाया संस्कृतछाया वेति नाम्ना संस्कृते च प्रस्तुताः सन्ति । अभिज्ञानशाकुन्तलस्य तु प्राकृतांशानां संस्कृतरूपान्तरणं कृत्वा प्राकृतविवृत्तिरपि लिखिता प्राप्यते । १४-१५ शतके तु संस्कृतज्यौतिषायुर्वेदनीतिकथासम्बद्धाः संस्कृतग्रन्था नेपालिहिन्दी-मराठी-गुजरात्यादिषु आधुनिकभाषासु भाषाटीकाभाषानुवादनाम्नानुवादकार्यं प्रारब्धं विलोक्यते ।

पाश्चात्यजगति यदा ऐतिहासिकभाषाविज्ञानसंस्कृतव्याकरणयोरध्यापनक्रमे 'संस्कृतभाषायां सम्बन्धकारकप्रयोगः' इति शीर्षके विद्यावारिधिकेन जेनेभाविश्वविद्यालयस्य प्राध्यापकेन फर्डिन्यान्डडिसोसुराख्येन भाषाशास्त्रिणा प्रतिपादितात् वर्णनात्मकसंरचनावादिभाषाविज्ञानात् प्रायोगिकभाषाविज्ञानं विकसितमभूत् । भाषायाः प्रायोगिकपक्षस्याध्ययनस्य क्रमे एवानुवादविज्ञानस्य चाध्ययनं प्रारब्धं दृश्यते । अस्मिन्नेवोपक्रमे रूपवादिनः रोमनयाकोब्सनविदुषः भाषिकचिन्तनेन सहानुवा-दविषये वैज्ञानिकं सैद्धान्तिकं व्यवस्थितञ्चाध्ययनं विहितं दृश्यते । विशेषतोऽनुवादाध्ययने रोमनयाकोब्सन-जेसीक्याटफोर्ड-पिटरन्यूमार्क-बुल्फ्रमविल्स-बेलिट-ह्यालिडे-गोर्जनज्लाट्को-युगेननाइडा-ज्याकडेरिडादिभिः विद्वद्भिः प्रस्तुता विचाराः प्रचलिताः युक्ताश्च सन्ति । अनुवादस्यान्तिमं सर्वस्वीकार्यञ्च लक्षणं कर्तुं न शक्यते इत्यनुवादशास्त्रज्ञा एव स्वीकुर्वन्ति । अनुवादस्य स्वरूपभेदवैविध्याद् भिन्नभिन्नप्रकारेणानुवादं लक्षयितुं शक्यते । अनुवादं परिचाययद्भिः विद्वद्भिः प्रस्तुतानि मतानि यथा प्रदर्श्यन्ते -

> अनुवादः स्रोतोभाषायामभिव्यक्तं सन्देशं नैकटिकस्वाभाविकसमतुल्यतया लक्ष्यभाषायामुत्पादनप्रक्रिया कार्यं वा विद्यते । -नाइडा (Naida, 1964 : 17)

एकस्यां भाषायां स्थितायाः पाठ्यसामग्र्याः स्थाने द्वितीयभाषायाः समतुल्यपाठ्यसामग्रीस्थापनमेवानुवादः ।
-क्याटफोर्ड (Catford, 1965 : 6)

एकस्यां भाषायां प्रस्तुतं सन्देशं द्वितीयभाषायां प्रस्तुतेन तेनैव सन्देशेन प्रतिस्थापनमेवानुवादः ।
-न्यूमार्क (Newmark, 1998 : 11)

अन्यभाषाया माध्यमेन शब्दसङ्केतयोर्व्याख्यानमेवानुवादः ।
-रोमन याकोब्सन (Jakobson, 2021 : 8-6)

एकस्यां भाषायां व्यक्तानां विचाराणां यथासम्भवं समानया सहजया चाभिव्यक्त्या द्वितीयभाषायामभिव्यक्तेः प्रयासोऽनुवादः । -भोलानाथ तिवारी (तिवारी, १९७२, पृ. १७)

## अनुवादस्य प्रयोजनम्

विश्वस्मिन् मानवसमुदायैर्विविधा भाषाः प्रयुज्यन्ते परन्तु विश्वस्य यस्यां कस्यामपि भाषायां स्थिताः सिद्धान्ताः, दर्शनम्, विचाराः, ज्ञानविज्ञानसम्बद्धाः सर्वेऽपि विषयाश्च विश्वव्यापकाः सन्ति । एतेषां विश्वव्याप्तेः कारणं ज्ञानस्य स्थानान्तरणं रूपान्तरणं वा विद्यते । अनुवादः खलु विश्वसञ्चारस्य शक्तिमत् साधनं विद्यते । अतः स्रोतोभाषातस्तदन्यासु भाषासु ज्ञानभाण्डागारस्थानान्तरणमनुवादेनैव क्रियते । अनुवादस्य प्रयोजनादनुवादः किमर्थः ? इति प्रश्नस्योत्तरं लभ्यते । ज्ञानविज्ञानयोः क्षेत्रमतीव विस्तृतं विशालञ्चास्ति । भाषा-कला-साहित्य-विज्ञानेतिहास-दर्शन-मानवशास्त्रार्थशास्त्र-राजनीतिकशास्त्र-धर्मशास्त्र-समाजशास्त्रादयः सर्वेऽपि वाङ्मयसम्बद्धविषया ज्ञानविज्ञानयोर्मध्येऽन्तर्भवन्ति । एकस्यां भाषायामुत्पन्नानि अनन्तविषयक्षेत्राण्यनुवादस्य माध्यमेन निखिलजगति व्याप्तानि सन्ति ।

प्राचीनकाले चानुवादस्यौचित्यम्, महत्त्वञ्चासीदिति गेटे-प्यट्रिक-ह्वाइटनामधेयानां पाश्चात्य-विदुषामनुवा-दसम्बद्धविचारैः सुस्पष्टं ज्ञायते । अनुवादस्य माध्यमेनैव संस्कृते निबद्धा रामायण-महाभारत-शाकुन्तल-पञ्चतन्त्रादयो ग्रन्थाः पाश्चात्यजगति ख्याताः सन्ति । आङ्गल-पारस्य-ग्रिक-ल्याटिन-फ्रान्सेलि-जर्मनभाषाया ग्रन्थाः विश्वस्यान्यभाषाप्रयो-क्तृभिः पठिताः । एकेन भाषिकसमूहेन समुत्पादितं ज्ञानं तदितरभाषाभाषी जनः, विद्वान् वा जानाति । अधुना विश्वस्य सर्वासु भाषासु लिखिताभिः सामग्रीभिर्नवीनान्वेषणमध्ययनमनुसन्धानं वा क्रियते । तत्र पूर्णतयानुवाद एव कारणं विद्यते । अधुना विश्वस्य कतिपयभाषासु सुसाङ्ख्यस्य माध्यमेनानुवादपद्धतिर्विकसिता विद्यते । वक्त्रा स्वकीयभाषायामभिव्यक्तान् विषयान् श्रोता यन्त्रस्य माध्यमेन भाषान्तरणं विधाय स्वकीयभाषायां श्रोतुं शक्नोति । अनुवादस्य प्रयोजनं सङ्क्षेपेण यथा दर्शयितुं शक्यते (गौतम, २०१८-१९, पृ. ४) -

१) भाषिकवैविध्यसांस्कृतिकसम्पर्कवृध्यर्थम्,

२) प्राचीनस्य लोपोन्मुखस्य च वाङ्मयस्य संरक्षणाय,

३) ज्ञानस्य क्षेत्रविस्तारेण नवीनानुसन्धानाध्ययनाभ्यां भाषासाहित्ययोः संस्कृतेश्च विकासविस्ताराय,

४) भाषायां शब्दभाण्डागारवृध्यर्थम्, प्राचीनग्रन्थानां संरक्षणाय, प्रचाराय, व्यापकीकरणाय च,

५) सञ्चारेण, प्रविधिना च सह परिचितो भूत्वा स्वं निरन्तरनवीनज्ञानाद्यावधिकं कर्तुं तथा विश्ववाङ्यपरिचेतुम्,

६) अविकसितानां विकासोन्मुखानाञ्च राष्ट्राणां भाषासाहित्ययोः समुन्नतये ।

## अनुवादस्य प्रकाराः

अनुवादाः कतिप्रकारका भवन्तीति वक्तुं निश्चितः कोऽप्याधारो न लभ्यते । विविधाधारेणानुवादोऽनेकभेदेषु परिगण्यते । रोमन याकोब्सनाख्येन पाश्चात्यविदुषा १९५९ तमे ईशवीयाब्देऽनुवादस्य प्राथम्येन व्यवस्थितं वैज्ञानिकञ्च वर्गीकरणं कृतं लभ्यते । तेनानुवादस्य भाषान्तरिक-अन्तर्भाषिक-भाषेतरभेदेन त्रयो भेदाः दर्शिताः सन्ति । (Jakobson, 2021 : 8-6) अनुवादस्य वर्गीकरणक्रमे तत्परवर्तिभिः विद्वद्भिः विविधाधारेण स्वकीयानि प्रकाराणि प्रस्तुतानि सन्ति । सर्वेषां विदुषां वर्गीकरणानि आधृत्य समग्रतोऽनुवादं यथा वर्गीकर्तुं शक्यते -

**लयस्य/छन्दस आधारेणानुवादभेदाः**

अनुवादो लयाधारेण गद्यपद्यभेदेन द्विविधः । गद्यरचनायाः पद्यरचनाया वा रूपान्तरणं गद्यभाषायां क्रियते चेत् स गद्यानुवादः । मूलरचना गद्ये पद्ये वा भवेत् तस्याः रूपान्तरिता रचना पद्यबद्धा भवति चेत् स पद्यानुवादः । अनुवादस्य प्रकारेऽस्मिन् अनूद्यसामग्री गद्यपद्ययोर्मध्ये यद्वा तद्वा भवेदनुवादेन तद्भिन्नसंरचनायां (गद्ये पद्ये वा) नीयते । अत्र गद्यात् पद्ये पद्यात् गद्ये विहितोऽनुवादः प्रमुखो मन्यते । इत्थं लयं छन्दो वाऽधारीकृत्याऽप्यनुवादस्य वर्गीकरणं विधीयते ।

**अनुवादस्वरूपाधारेण प्रकृत्याधारेण वाऽनुवादभेदाः**

अनुवादस्य स्वरूपाधारेण प्रकृत्याधारेण वा द्वौ भेदौ भवतः । यथा - शब्दानुवादः भावानुवादश्च । शब्दानुवादः मूलनिष्ठानुवादश्च भण्यते । तस्यापि विविधा भेदोपभेदाः सन्ति । ते यथा -

**शब्दानुवादः**

यस्मिन् स्वरूपे स्रोतःसङ्कथनं विद्यते तस्मिन्नेव स्वरूपे लक्ष्यसङ्कथनरचनं शब्दानुवादे क्रियते । एतादृशेऽनुवादे सङ्कथनस्य वाक्यसंरचनां, शैलीं, कथनपद्धतिञ्च पूर्ववत् संस्थाप्य सङ्कथनं लक्ष्यभाषायां प्रस्तूयते । तेन लक्ष्यसङ्कथनमपि स्रोतःसङ्कथनसदृशं भवति । एतादृशेनानुवादेन स्रोतःसङ्कथनस्य प्रतिपाद्यविषये काऽपि हानिर्न जायते । एतेनैव कारणेन शब्दानुवादः मूलनिष्ठानुवादोऽपि कथ्यते । शब्दानुवादस्य चानेके भेदाः सन्ति ।

**समानक्रमानुवादः**

समानक्रमानुवादे स्रोतःसङ्कथने पदानां यः क्रमः विद्यते तेनैव क्रमेण लक्ष्यसङ्कथने च पदविन्यासः क्रियते । अनुवादोऽयं स्रोतोलक्ष्यभाषयोः व्याकरणसाम्ये शोभनः वैषम्येऽशोभनः । अतः द्वयोर्भाषयो मिथः व्याकरणं समानं न भवति चेत् अतीव कृत्रिमः हासकरश्च जायते । संस्कृते कर्तृकर्मक्रियापदानां विन्यासः यथातथा कर्तुं शक्यते । येनकेनाऽपि क्रमेण एतेषां स्थापनं विदधीत तेन व्याकरणव्यवस्थायां न काऽपि क्षतिर्जायते । नेपालिभाषायां त्वादौ कर्ता, मध्ये कर्म, अन्ते क्रिया च क्रमशः संस्थाप्य वाक्यानि निर्मीयन्ते । एतादृशे पदक्रमे व्यत्यये सति वाक्यं सम्यक् न भवति । आङ्गलभाषायाः वाक्ये पूर्वं कर्तुः, तदनु क्रियायाः, अन्ते कर्मणः स्थापनं विधीयते । संस्कृतस्य “गच्छाम्यहं गृहम् ।” इति वाक्यं नेपाल्याम्, आङ्ले च समानक्रमानुवादे कृते तु तस्मिन् वाक्ये पदक्रमस्य व्यत्ययो भवति । यदि “फलं बालकः खादति ।” इति वाक्यं समानक्रमेण नेपाल्यामनूद्यते तर्हि वाक्यार्थबोधे काठिन्यमनुभूयते । तदेव वाक्यं “बालकः फलं खादति ।” इति स्यात् तर्हि नेपाल्यामनुवादः शोभनः, आङ्गले त्वशोभनः । तथैव “बालकः खादति फलम् ।” इति वाक्यमाङ्गले शोभनः, नेपाल्यामशोभनः ।

**स्वक्रमानुवादः**

यत्रानुवादे स्रोतःसङ्कथने शब्दानां यः क्रमः तेन क्रमेण लक्ष्यसङ्कथनस्य पदानि नैव स्थापयित्वा लक्ष्यभाषायाः व्याकरणानुसारेण पदक्रमसङ्घट्टनं विधीयते स स्वक्रमानुवादः । एतादृशोऽनुवादः लक्ष्यभाषायाः व्याकरणस्य नियमानुसारेण क्रियते । एतस्मिन्ननुवादे समानक्रमानुवाद इव पदक्रमव्यत्ययो न दृश्यते परन्तु भावेऽर्थे वा साम्यं सदैव भवितुं न शक्नोति । अतोऽनुवादकाले एतदपि सम्यक् विचारणीयं भवति । एतादृशे स्थले वाच्यलक्ष्यार्थयोः स्थाने व्यङ्ग्यार्थस्य प्रयोगः कर्तव्यः । नेपाल्याः “म गीत गाउँछु ।” इत्यस्य “अहं गीतं गायामि ।” इति अनुवादः स्वक्रमानुवादोऽस्ति । कदाचित् “स्थालीपुलाकन्यायम्” इत्येतादृश्य उक्तयः भाषान्तरेऽनूद्यन्ते चेत् स्रोतस्सङ्कथनस्यार्थबोधे विघ्नः समुत्पद्यते ।

**आदर्शानुवादः**

यस्मिन् भाषान्तरणे स्रोतःसङ्कथनान्तर्गता भाषाशैली कथनपद्धतिः, सूक्तयः, बिम्बप्रतीकालङ्काराः, व्यङ्ग्यादयश्च यथावत् लक्ष्यसङ्कथने नीयन्ते तदादर्शानुवादः । इयमेवानुवादस्य स्थितिरादर्शभूता । एतादृशमनुवादं कर्तुं स्रोतोलक्ष्यभाषयोर्निष्णातेन कुशलेनानुवादकेनैव शक्यते । एतादृशेऽनुवादे भिन्नभाषायां मूलसङ्कथनस्य शैल्यां, कथनपद्धत्याञ्च मूलसङ्कथनस्यैव सङ्घटने स एव भावः, विचारश्च प्रस्तूयते । अत्र स्रोतोभाषायाः शैलीगतपक्षमनुपेक्षितं भवति । अतोऽनुवादोऽयमादर्शानुवादः कथ्यते । आदर्शानुवादेऽनुवादकः स्रोतःसङ्कथनस्य किमपि न जहाति, स्वकीयं किमपि न योजयति च । अतोऽयं कठिनतरः । वाक्यरचना व्याकरणविन्यासशैली च लक्ष्यभाषानुरूपे भवतः । इयमेवादर्शानुवादस्य वैशिष्ट्यं विद्यते ।

आदर्शानुवादे शब्दानुवाद-भावानुवाद-स्वक्रमानुवाद-छायानुवादादीनां सर्वेषामनुवादपद्धतीनां काश्चित् विशेषताः समाविष्टा भवन्ति। अनुवादोऽयं बह्वीनां पद्धतीनां समष्टिर्वर्तते। आदर्शानुवादे भाषायाः सामान्यप्रयोगमतिरिच्य विशिष्टप्रयोगोऽपेक्षितो भवति । अतोऽत्रार्थगाम्भीर्ये च विशेषा दृष्टिरावश्यकी । सूक्तीनाम्, लोकोक्तीनाम्, अनुकरणमूलानां शब्दानाम्, अलङ्काराणाम्, व्यञ्जनायाश्चानुवादो जटिलः, कदाचिदसम्भवो भवति । एतस्यामवस्थायामपि कुशलेनादर्शानुवादकेन भावे स्वल्पामपि क्षतिं विनैवानुवादः कर्तव्यः ।

भाषायाः सामान्यप्रयोगे विशिष्टप्रयोगे च स्खलनं विना लक्ष्यसङ्कथनपठने मूलसङ्कथनाध्ययनम् इवानुभूतिप्रदानमेवादर्शानुवादकस्य वैशिष्ट्यमस्ति । अनुवादोऽयं स्रोतोलक्ष्यभाषयोः मिलनबिन्दुर्मन्यते । आदर्शानुवादे द्वयोर्भाषयोर्वर्णशब्दवाक्यार्थसन्दर्भगतसमन्वयस्य प्राप्तिर्भवति । एतादृशीनां सर्वासां विशेषतानां समष्टिरादर्शानुवादः दुर्लभ एव ।

**शैलीपक्षाधारेणानुवादभेदाः**

सङ्कथने स्थितानां शैलीगतपक्षाणामाधारेऽप्यनुवादस्य भेदाः भवन्ति । आधारेऽस्मिन्नेकोन्मुख-द्वयोन्मुखेति द्वौ भेदौ भवतः ।

**एकोन्मुखोऽनुवादः**

अनुवादे भिन्नयोर्द्वयोर्भाषयोः समुपस्थितिर्दृश्यते । स्रोतोभाषायाः सङ्कथनं लक्ष्यभाषायाः सङ्कथने रूपान्तरणक्रमे एकस्या भाषायाः शैली गृह्यते चेत् तत्र एकोन्मुखोऽनुवादो भवति । सैद्धान्तिकदृष्ट्या द्वयोर्भाषयोर्मध्ये एकस्या भाषायाः शैलीपक्षे पक्षपाते कृतेऽपि यथासम्भवं स्रोतोभाषायाः शैलीपक्षस्य स्थापने यत्नः क्रियते । अतः एकोन्मुखानुवादे लक्ष्यभाषाया विषये चिन्तनं न्यूनं भवति । एकस्या भाषायाः शैलीपक्षे विशेषाग्रहादनुवादोऽयमेकोन्मुखानुवादः कथ्यते ।

**द्वयोन्मुखोऽनुवादः**

स्रोतोभाषायाः सङ्कथनं लक्ष्यभाषायाः सङ्कथने नेतुं द्वयोर्भाषयोः शैलीपक्षौ समानतया गृहीत्वा यद्यनुवादः क्रियते तदा अनुवादः द्वयोन्मुखः कथ्यते । एतादृशेऽनुवादे स्रोतोभाषायाः शैलीपक्षानां लक्ष्यभाषायामपि स्थापनाय यत्नः क्रियते । विषयप्रस्तुतौ च सन्तुलनस्थापनाय प्रयासो भवति । अत्र स्रोतोलक्ष्ययोः द्वयोरेव भाषयोः शैली, संरचना, कथनपद्धतिरित्यादीनां मिथस्सन्तुलनस्थापनाय यत्नः क्रियते । अतोऽयमादर्शानुवादेन नैकट्यं भजते ।

**भाषिकस्वरूपाधारेणानुवादभेदाः**

अनुवादस्य भाषिकस्वरूपाधारेण च भेदाः प्रदर्शयितुं शक्यन्ते । एतस्मिन् वर्गीकरणे प्रमुखाधारतया भाषिकसङ्केतो गृह्यते । आधारेऽस्मिन्नन्तरभाषिक-भाषान्तरिक-भाषेतरभेदेनानुवादो विभज्यते ।

**अन्तरभाषिकानुवादः**

स्रोतोभाषातः लक्ष्यभाषायां विहितोऽनुवादोऽन्तरभाषिकः । एष भाषान्तरानुवादश्च कथ्यते । एकस्यां भाषायां निबद्धानां सामग्रीणां द्वितीयभाषायां रूपान्तरणमेवान्तरभाषिकानुवादे क्रियते । अनुवादशब्देन सामान्यतयाऽन्तरभाषिकानुवादो बोध्यते । गद्यानुवादः, पद्यानुवादः, शब्दानुवादः, भावानुवादः, छायानुवादः, एकोन्मुखोऽनुवादः, द्वयोन्मुखोऽनुवाद इत्यादयोऽनुवादस्य सर्वे भेदोपभेदा भाषान्तरानुवादे अन्तरभाषिकानुवादे वा आगच्छन्ति ।

**भाषान्तरिकानुवादः**

अनुवादोऽयमन्तःभाषिकानुवादोऽपि कथ्यते । एकस्यां भाषायां स्थितासु विविधोपभाषासु मिथो रूपान्तरणं क्रियतेऽस्मिन् भेदे । छन्दोऽन्तरानुवादः, काव्यविधागतोऽनुवादः, कथनपद्धत्याधारितोऽनुवादः, अभिव्यक्तिप्रक्रियाधारितोऽनुवाद इत्यादयो भेदा भाषान्तरिकानुवादे आगच्छन्ति । भाषाया एकस्य शब्दस्य स्थाने समानार्थकद्वितीयशब्दस्थापनमपि भाषान्तरिकानुवादः । "ते हि नो दिवसाः गताः ।" इत्यस्य "आवाभ्यां तानि दिनानि यापितानि ।" इति तथैव "जनकः सुतं व्याकरणमध्यापयति ।" इत्यस्य "पिता पुत्रं शब्दशास्त्रं पाठयाति ।" इति चास्योदाहरणे स्तः । एवमेव लिप्यन्तरणमपि भाषान्तरिकानुवादे गण्यते । संस्कृतवाङ्मये निघण्टौ, निरुक्ते, ब्राह्मणे, आरण्यके च वेदमन्त्राणां व्याख्या व्युत्पत्तिर्वा लभ्यते । स्कन्धस्वामि-नारायणोद्गीथ-माधवभट्ट-सायणाचार्य-दयानन्द-पतञ्जलि-शङ्कराचार्यादीनां भाष्यग्रन्थाः प्राप्यन्ते । अनेकाः

टीकाः, फक्किकाश्च रचिताः सन्ति । इयं परम्परा भाषान्तरिकप्रतीकान्तरणमेव । अतः संस्कृतवाङ्मये भाषान्तरिकानुवादस्यातीव समृद्धा परम्परा लभ्यते ।

**भाषेतरानुवादः**

अनुवादोऽयं अन्तरप्रतीकात्मकानुवादेति च कथ्यते । अनुवादे भाषायाः स्थाने चित्र-सङ्गीत-मूर्ति-हस्तसङ्केतादीनि वाक्प्रतीकभिन्नानि प्रतीकानि प्रयुज्यन्ते चेत् स भाषेतरानुवाद उच्यते । अत्र भाषायाः सङ्केतस्य स्थाने हस्तसङ्केताभिनय-चित्र-तालिका-रेखादिभिर्विचारा भावाश्च प्रस्तूयन्ते । “अत्र एहि ।” इति वाक्येन बोधितमर्थं हस्तसङ्केतेन बोधनम्, “नास्ति ।” इति बोधनाय शिरःसञ्चालनम्, मार्गे यानानां गमनागमननियन्त्रणाय विविधरङ्गकाणां दीपानां प्रयोगः, विद्यालयप्रारम्भादौ समयसूचनाय घण्टावादनञ्चेत्यादयः भाषेतरानुवादस्योदाहरणानि सन्ति ।

**अनुवादप्रविध्याधारेणानुवादभेदाः**

अनुवादस्य प्रविध्याधारेण द्वौ भेदौ भवतः । तौ यथा - मानवीयानुवादः, यान्त्रिकानुवादश्च । मानवीयानुवादस्सामान्यानुवादोऽपि कथ्यते । अस्मिन्ननुवादे मानवमस्तिष्कस्य प्रयोगो भवति । यन्त्रिकानुवादे सुसाङ्ख्ययन्त्रस्य माध्यमेन भाषान्तरणं भवति । अत्र स्रोतोभाषायाः लक्ष्यभाषायाश्च शब्दाः, तेषामर्थाः, नियमाश्च कार्यक्रमबद्धतया स्थाप्यन्ते । तस्याधारेण स्वचालतिरूपेण यन्त्रः सर्वमनुवादकार्यं सम्पादयति । एतादृशेऽनुवादे स्रोतोलक्ष्ययोर्भाषयोर्व्याकरणव्यवस्थायाः संयोजनम्, सूचनायाः सङ्कलनम्, व्यवस्थापनम्, शब्दभाण्डागारार्थव्यवस्थयोः व्यवस्थापनादयः सर्वाः भाषिकव्यवस्थाः सुसाङ्ख्यप्रणाल्यां विनिवेशनं कर्तव्यं भवति । (शर्मा, २०१३, पृ. २१८) अत्र मानवमस्तिष्कस्य कार्यं यन्त्रमस्तिष्केण क्रियते । अतोऽयं पराश्रितो भवति । अधुना वक्ता एकस्यां भाषायां भाषितं ध्वनियन्त्रसुसाङ्ख्ययन्त्रयोर्माध्यमेन श्रोता स्वानुकूलभाषायां श्रोतुमपि शक्नोति । अधुना एतादृशा अनेके सुसाङ्ख्यकार्यक्रमा निर्मिताः सन्ति । यन्त्रिकानुवादस्य काश्चित् विशेषता यथा सन्ति (गौतम, २०१८-१९, पृ. ८) । -

१. यान्त्रिकानुवादे वैद्युतयन्त्रेण कार्यं क्रियते अतः कार्यं शीघ्रं व्यवस्थितञ्च भवति ।

२. अत्र सूचनायाः ग्रहणम्, प्रदानम्, स्थापनम्, तथ्यसङ्कलनञ्च यन्त्रेणैव क्रियते ।

३. अनुवादोऽयं बहुलतया अन्तर्जालस्य माध्यमेन क्रियते ।

४. सूचनायाः तथ्याङ्कीकरणं सामान्यीकरणं समस्यासमाधानञ्च यन्त्रेणैव क्रियते ।

५. सुसाङ्ख्ययन्त्रेणाप्राप्तप्रवेशानां विषयाणां विश्लेषणमनुवादश्च कर्तुं न शक्यते ।

६. एतस्मादनुवादात् भाषिकसंरचनायाः रूपान्तरणं भवति किन्तु रूपान्तरणे काश्चित् सीमाः भवन्ति । इत्यादयः ।

यन्त्रिकानुवादो रुसदेशात् प्रारब्धो दृश्यते । रुसदेशीयेन पेत्रोभिच त्रयोन्स्कीनामकेन विदुषा निर्मितेन यन्त्रेण कतिपयशब्दानां रूपान्तरणं कृतम् । बेलायतदेशस्य ए. डी. वुथाख्येन विदुषा १९४३ तमे ईशवीयाब्दे वारेनविच्-रिवेन्सविदुषोः सहकार्येण द्वैभाषिककोशमाधारीकृत्य यन्त्रस्य निर्माणं कृतम् । ततोऽमेरिकादेशे जर्मनीदेशे च यान्त्रिकानुवादस्य प्रविधिः विकसितो जातः । १९५५ तमे ईशवीयाब्दे यान्त्रिकानुवादपद्धतिः रुसदेशे किञ्चित् व्याप्ता जाता । अधुनाऽयं प्रविधिः विश्वस्य बहुषु राष्ट्रेषु प्रयुक्तो दृश्यते । अनुवादज्ञाः शब्दवर्गस्य, वाक्यसङ्गतेः, पदक्रमस्य, आपरिवर्तनस्य, व्याकरणव्यवस्थायाश्च यन्त्रे प्रवेशानन्तरं यान्त्रिकानुवादोऽधिकविश्वसनीयो युक्तश्च भविष्यतीति कथयन्ति । (Newmark, 1998 : 107)

इदानींतने सूचनाप्रविधियुक्ते समये यान्त्रिकानुवादस्य महत्त्वमावश्यकता च वर्धमानं विद्यते । द्वैभाषिकजनस्यावश्यकता च यान्त्रिकानुवादेन विस्थापनोन्मुखा दृश्यते । नेपालश्च सूचनाप्रविधितोऽसपृक्तो न । जापानदेशे निर्मितेन स्वफियाभिधेयेन मानवयन्त्रेण सह जनसम्भाषणञ्च दृष्टमस्ति । इमेल-फ्याक्स-टेलिग्राफादिषु, अन्ताराष्ट्रियसम्मेलनेषु, मदनपुरस्कारपुस्तकालयादिस्थलेषु च यान्त्रिकानुवादः अंशतः प्रविष्टः प्राप्यते ।

**विषयाधारेणानुवादभेदाः**

अनुवादो विषयाधारेण च विभक्तो दृश्यते । एतस्मिन्नाधारेऽनुवादस्यान्तर्विषयकः, विषयान्तरिकः, संरचनात्मकः,

साहित्यिकः, वैज्ञानिकः, प्राविधिक इत्यादयो भेदाः परिगणिताः सन्ति । अनूद्यरचनायाः कथ्यभावान्तर्वस्तूनां तत्सम्बद्धविषयक्षेत्राधारितोऽनुवादः वैषयिकानुवादे गण्यते ।

**अन्तर्वैषयिकानुवादः**

अन्तर्वैषयिकानुवादे एकविषयक्षेत्रसम्बद्धा रचना तस्मिन्नेव विषयक्षेत्रेऽनूद्यते । एष विषयक्षेत्रान्तरिकानुवाद इति च कथ्यते । साहित्यस्य साहित्येऽनुवादोऽन्तर्वैषयिकानुवादो भवति । अनुवादेऽस्मिन् विषयक्षेत्रस्य परिवर्तनं विनैव रचनायाः स्रोतोभाषातो लक्ष्यभाषायां भाषान्तरणं क्रियते ।

**विषयान्तरिकानुवादः**

एकस्मिन् स्वरूपे स्थिताया अभिव्यक्त्याः पूर्वप्रकारभिन्नाभिव्यक्तौ रूपान्तरणमेव विषयान्तरिकानुवादः। साहित्यिकाभिव्यक्तेः साहित्येतराभिव्यक्तौ, साहित्येतराभिव्यक्तेः साहित्यिकाभिव्यक्तौ रूपान्तरणमपि विषयान्तरिकानुवादोऽस्ति । अनुवादोऽयमन्तर्वैषयिकानुवादेन सह वैपरीत्यं भजते । प्राविधिकविषयाणामप्राविधिकविषये, अप्राविधिकविषयाणां प्राविधिकविषये रूपान्तरणं विषयान्तरिकानुवादे क्रियते ।

**संरचनात्मकानुवादः**

अनूद्यरचनायाः संरचना-भाषातत्त्व-शैल्यादिषु पक्षपातपूर्वकं यदानुवादः क्रियते तदा संरचनात्मकानुवादो भवति । एतादृशेऽनुवादे भाषातत्त्वं महत्त्वपूर्णं मन्यते । अनुवादकार्ये स्रोतोभाषायाः भाषिकसंरचना, शैली, शब्दभाण्डागार इत्यादीनां लक्ष्यभाषायामपि यथावत् स्थापनाय प्रयतनमेतादृशानुवादस्य वैशिष्ट्यं मन्यते ।

**साहित्यिकानुवादः**

साहित्यिकरचनाया रूपान्तरणं साहित्यिकानुवादः। स्रोतोभाषायाः साहित्यिकरचनाः कविताख्यान-नाटक-निबन्धादयो लक्ष्यभाषायां नीयन्ते चेत् तत् साहित्यिकानुवादः कथ्यते। भावप्रधानस्यानुवादस्य भाषान्तरणप्रक्रिया जटिला भवति। तत्रापि कविताया अनुवादोऽतीव जटिलो भवति । भाषावैज्ञानिकदृष्ट्या भाषायाः विशेषप्रयोगः साहित्यिकानुवादोऽस्ति ।

सुभाषितालङ्कारलक्षणाव्यङ्ग्यभावचमत्कारादीनां यथावदनुवादो दुष्करं कार्यं विद्यते । एतादृशेऽनुवादे वैयक्तिकप्रभावश्च दृश्यते । प्रत्येकमनुवादेषु वैविध्यमपि द्रष्टुं शक्यते । मूलरचनाया भावज्ञानं विना साहित्यिकानुवादो न सम्भवति । (दीक्षित, २०१९, पृ. १४८) बहुकालाद् बहवो साहित्यिकानुवादाः क्रियमाणाः सन्ति । साहित्यिकानुवादस्यान्तर्विकासश्च निरन्तररूपेण जायमानोऽस्ति ।

साहित्यस्य भेदाधारेण चानुवादभेदा भवन्ति । काव्यविधानुसारेणानुवादस्य काव्यानुवादः, आख्यानानुवादः, नाटकानुवादः, निबन्धानुवादश्चेति प्रमुखाश्चत्वारो भेदा भवन्ति । स्रोतोभाषायाः काव्यविधाविशेषे स्थितानि सङ्कथनानि तस्मिन्नेव विधायां तदितरविधायां वा रूपान्तरणं क्रियतेऽस्मिन्ननुवादे । स्रोतोभाषायाः कवितामनूद्य लक्ष्यभाषायामपि कविता निर्मीयते वा नाटकाख्याननिबन्धादयः कवितेतरकाव्यानि कवितारूपेणैव प्रस्तूयन्ते चेत् तादृशोऽनुवादः काव्यानुवादः कथ्यते । आख्यानकवितानिबन्धनाटकादयः स्रोतोभाषातः लक्ष्यभाषायां रूपान्तरणं कृत्वाख्यानमेव निर्मीयते चेत् तदाख्यानानुवादः । तथैव स्रोतोभाषाया नाटकं तदितरकाव्यं वा लक्ष्यभाषायामनूद्य नाटकं क्रियते चेत् तन्नाट्यानुवादः कथ्यते । एवमेव स्रोतोभाषाया निबन्धमनूद्य लक्ष्यभाषायामपि निबन्धो विधीयते यद्वा निबन्धेतरकाव्यानि निबन्धे रूपान्तरणं क्रियते चेत् निबन्धानुवादः ।

**प्राविधिकानुवादः**

प्राविधिकानुवादः विज्ञानप्रविधिव्यापारादिविविधक्षेत्राणां वैषयिकवर्गीकरणस्य प्रकारो विद्यते । प्राविधिकानुवादो विज्ञानप्रविध्यादिव्यावहारिकक्षेत्रस्य पक्षेण सह सम्बद्धो भवति । (अधिकारी, २०७७, पृ. २८) सूचनायाः सम्प्रेषणं प्राविधिकानुवादस्य प्रमुखोद्देश्यमस्ति । सूचना भाषासंस्कृतिबद्धा न भवति । अतः प्राविधिकानुवादः संस्कृतिनिरपेक्षः सार्वभौमश्च मन्यते । (पूर्ववत्, पृ. २९) सूचनायाः सम्प्रेषणात्मिकया वस्तुपरकया शैल्या प्राविधिकानुवादः कलापक्षतः दूरे, विज्ञानेन सह समीपे दृश्यते । विज्ञानप्रविधिक्षेत्रस्य ग्रन्थाः लेखाश्च स्रोतोभाषातो लक्ष्यभाषायाम्, तथा च

सूचनाप्रविधि-सञ्चारमाध्यम-प्रशासन-विधिक्षेत्रसम्बद्धानां विषयाणां रूपान्तरणं प्राविधिकानुवादे क्रियते । (शर्मा, २०१३, पृ. १२२- १६१) एतादृशः प्राविधिकानुवादः स्रोतोभाषानिकटः वस्तुगतश्च भवति । अत्र स्रोतोभाषायाः कतिपयशब्दाः लक्ष्यभाषायामपि नीताः भवन्ति । नूतनशब्दानां प्रवेशेन लक्ष्यभाषायाः शब्दभाण्डागारं समृद्धञ्च भवति ।

**अन्यविविधाधारेणानुवादभेदाः**

अनुवादस्य वर्गीकरणमुक्तेष्वाधारेषु परिमितं नास्ति । अस्य बहवो भेदोपभेदाः सन्ति । एतेषु प्रकारेषु सारानुवादः, आख्यानानुवादः, छायानुवादः, रूपान्तरणम्, वार्तानुवादश्चेति प्रमुखाः सन्ति । स्रोतोभाषायाः सामग्रीः सङ्क्षिप्य लक्ष्यभाषाया-मनूद्यते चेत् सारानुवादो भवति । एतादृशेऽनुवादे व्याख्यात्मकाः विशालाश्च पाठाः सारसङ्ग्रहेण सङ्क्षिप्य वा प्रस्तूयन्ते । व्याख्यानुवादः सारानुवादेन सह वैपरीत्यं भजते । अनुवादेऽस्मिन् व्याख्याविश्लेषणद्वारा स्रोतोभाषायाः विषयाः व्याकृता भवन्ति । एष भाष्यानुवादोऽप्युच्यते । संस्कृतस्य निरुक्तब्राह्मणारण्यकेषु वेदमन्त्राणां व्याख्यानं विहितं दृश्यते । तथैव स्कन्ध-नारायणोद्गीथ-माधवभट्ट-सायणाचार्य-दयानन्दसरस्वतीत्यादीनां वेदभाष्याणि, पातञ्जलवैयाकरणमहा-भाष्यम्, गीताब्रह्मसूत्रयोः शङ्कराचार्य-रामानुज-वल्लभादिभिः कृतानि भाष्याणि, ध्वन्यालोकलोचनादयो बहवो टीकाग्रन्थाः तथैव बह्व्यः फक्किकाश्च भाष्यानुवादस्योदाहरणानि सन्ति । (तिवारी, १९७२, पृ. १२) संस्कृतवाङ्मये भाष्यानुवादस्यातीव विकासः दृश्यते । छायानुवादः शब्दानुवादसमानस्वरूपात्मकोऽनुवादो विद्यते । रूपान्तरणमपि तस्यैव नैकटिकः विद्यते । रूपान्तरणस्य व्यापकः सङ्कुचितश्चेति द्वावर्थौ प्रचलितौ स्तः । व्यापकेऽर्थे गृहीते सति रूपान्तरणशब्दोऽनुवादस्य सर्वान् भेदान् बोधयति । सङ्कुचितार्थे तु काव्यविधापरिवर्तनमिति भवति । वस्तुतो रूपान्तरणशब्देन प्रविधिकशब्दानामनुवादं साहित्यस्य काव्यनाटकाख्यानादीनां तदन्यप्रकारे नयनं वा बोध्यते । स्रोतोभाषायामुच्चरितानां विषयाणां तत्क्षणमेव लक्ष्यभाषायां प्रस्तुतिर्वार्तानुवादः । एष मौखिकानुवादः, तात्क्षणिकानुवादः, तात्कालिकानुवादः, आश्वनुवादश्च कथ्यते । वार्तालापस्य सम्भाषणस्य, प्रवचनस्य, प्रत्यक्षतो द्वैभाषिकेण विधीयमानोऽनुवादश्च वार्तानुवादः कथ्यते ।

अनुवादस्य इत्येतादृशा बहवो भेदोपभेदाः सन्ति । अनुवादस्यैकप्रकारे तदितरे प्रकाराः चान्तर्गर्भिताः भवितुं शक्नुवन्ति । सामान्यतोऽनुवादभेदाः स्रोतोभाषायाः सङ्कथनं लक्ष्यभाषायामनुवादस्य प्रक्रियया पद्धत्या च सह सम्बद्धा भवन्ति ।

## अनुवादस्य प्रक्रिया, पद्धतिर्मान्यता च


अनुवादकार्यम्, तस्मिन् सम्पाद्यानाञ्चरणानां प्रकार्यात्मिका स्थितिश्चानुवादप्रक्रिया विद्यते चेदनुवादविधिरेव पद्धतिरित्युच्यते । अनुवादकार्यं कया प्रक्रियया पद्धत्या च सम्पन्नं भवतीति विषये पाश्चात्यविद्वद्भिः क्याटफोर्ड-न्युमार्क-नाइडा-वाथगेटादिभिः विविधा मान्यताः धारणाश्च प्रस्तुताः सन्ति । तेषामेव मान्यताधारेणानुवादस्य विविधाः पद्धतयः प्रविधयश्च निरूपिताः सन्ति । सामान्यतः पद्धतिविधिशब्दौ समानार्थकौ परन्त्वत्र द्वावेतौ शब्दौ पृथगर्थे प्रयुक्तौ स्तः । पद्धतिशब्दः विस्तृतमर्थं बोधयति चेत् विधिशब्दः पद्धत्यपेक्षया सङ्कुचितार्थे प्रयुक्तोऽस्ति । एकस्यां पद्धतौ बहवो विधयः भवितुं शक्नुवन्ति । अनुवादपद्धत्यानुवादप्रक्रिया, अनुवादोत्पादनम्, भाषासंस्कृतिसम्बद्धावधारणायाः समग्रता च बोध्यते । अनुवादपद्धतिरनुवादकस्यानुवादविषयिका सैद्धान्तिकी, अनुभवात्मिका, अन्तरज्ञानमूला च पक्षधरता विद्यते । (अधिकारी, २०७७, पृ. ९० ) पद्धतिरवधारणात्मिका भवति चेदनुवादविधिस्तु वास्तविकमनुवादकार्यमस्ति । एष प्रक्रियात्मको भवति । विधेरवयवरूपेण युक्तयः समागच्छन्ति । कदाचिदेकस्यामेव विधौ बह्व्यः युक्तयः समाविष्टा भवन्ति । विद्वद्भिः प्रस्तुतमान्यतायाः विधेरवधारणायाश्चाधारेण बलरामोऽधिकारी सामयिकपद्धतीर्यथा प्रस्तौति - भाषावैज्ञानिकपद्धतिः, सांस्कृतिकपद्धतिः, उत्तरौपनिवेशिका पद्धतिः, सौन्दर्यपरकपद्धतिश्चेति । (पूर्ववत्, पृ.९२)

अनुवादकः कीदृशस्य सङ्कथनस्य पाठस्य वाऽनुवादं करोति तस्याधारेण हि पद्धतिर्विधिश्च निर्धारितौ भवतः । अनुवादको विधेश्चयनाय स्वतन्त्रो भवति परन्तु तेन मूलकृतेर्भाषिकसांस्कृतिकमौलिकतायाः संरक्षणे सचेष्टेन भवितव्यम् । तथैव लक्ष्यकृतेः बोधगम्यता, सम्प्रेषणीयता च महत्त्वपूर्णा भवति । अनुवादकेन स्रोतोलक्ष्ययोर्द्वयोर्भाषयोः, संस्कृतेश्च विषये समानव्यवहारः प्रदर्शनीयो भवतीत्यनुवादपद्धतेः प्रमुखा मान्यताऽस्ति । (पूर्ववत्, पृ.१०५) अनुवादस्य सर्वाः मान्यता एताभिः पद्धतिभिः संबद्धाः सन्ति ।


अनुवादकार्यं स्रोतोलक्ष्यभाषासंबद्धं भवति । अनुवादे स्रोतोभाषायां निगूढानां विषयाणां लक्ष्यभाषायां स्थानान्तरणं क्रियन्ते । अतोऽनुवादप्रक्रिया द्वयोर्भाषयोः सम्मेलनबिन्दुरस्ति । अस्यां स्रोतोभाषायाः सङ्कथनानि पाठाः वाऽनुवादप्रक्रियया लक्ष्यभाषायां पुनरुत्पादिता भवन्ति । एतत् पुनरुत्पादनं नवनिर्माणं न, स तु केवलमान्तरभाषिकनिर्माणमस्ति । अनुवादविधौ प्रक्रियायां वा पठन-विश्लेषण-स्थानान्तरण-पुनःसङ्घट्टनानि चत्वारि चरणानि भवन्ति । (शर्मा, २०१३, पृ. ६७) अनुवादस्य पूर्वोक्तानि चरणानि जे.सी क्याटफोर्ड-युगेननाइडा-पिटरन्युमार्कादीनां पाश्चात्यभाषाचिन्तकानां मते मान्यतायाञ्चाधारितानि दृश्यन्ते । अतोऽत्र तेषामेव प्रमुखमान्यताः क्रमशः प्रस्तूयन्ते -

**जे.सी.क्याटफोर्डविदुषोऽनुवादसम्बद्धा मान्यता**

अनुवादचिन्तकः जे.सी. क्याटफोर्ड व्यवस्थापरकस्य प्रकार्यात्मकस्य च व्याकरणस्यानुयायी विद्यते । स सर्वासु भाषासु स्वकीया व्यवस्था भवतीति कथयन् भाषिकव्यवस्थाधारेणानुवादः स्वीकरणीय इति विचारं प्रस्तौति । तस्य स्रोतोभाषायाः लक्ष्यभाषायाश्च पाठः समानो भवतीति विचारो लभ्यते । तेन सङ्कथनस्याकृतेः श्रेण्याश्चाधारेणानुवादभेदाः दर्शिताः सन्ति । आकृतिदृष्ट्या श्रेणीबद्धश्रेणीमुक्तौ द्वौ भेदौ दर्शितौ, स्तरस्याधारेण च ध्वन्यात्मक-लिप्यात्मक-शाब्दिक-वैयाकरणादिभेदेषु वर्गीकृतोऽस्त्यनुवादः । अनुवादस्य क्याटफोर्डसम्मता भेदा यथा दर्शयितुं शक्यन्ते (अधिकारी, २०७७, पृ. ५९) -





क्याटफोर्ड भाषाविज्ञानस्य स्तरकोट्योः मान्यतामनुवादसमायोजनेऽपि प्रयुङ्क्ते । अनूदितस्य पाठस्य लक्ष्यभाषायाः व्याकरणपद्धत्यनुसारेण योजनाय मूलपाठस्य संरचना परिवर्तनीया भवति । क्याटफोर्डमते एतादृशं परिवर्तनं भाषिकस्तरे कोट्यां च भवति । तेन विदुषा तदेव मूलभाषायाः स्वरूपपरिवर्तनं स्वरपरिवर्तनं कोटिपरिवर्तनमिति कथितमस्ति । अनुवादक्रमे कर्तुं शक्यानि भाषिकपरिवर्तनानि समायोजनानि च रेखाचित्रेण यथा दर्शयितुं शक्यन्ते (पूर्ववत्)-




**युगेन नाइडाविदुषोऽनुवादसम्बद्धा मान्यता**

अधिकतराणामनुवादाचार्याणामनुवादसम्बद्धा विचारा भाषाविज्ञानस्य मान्यताभिः प्रभाविता दृश्यन्ते । युगेननाइडाविदुषोऽनुवादसिद्धान्ते च रूपान्तरणव्याकरणस्य प्रभावो दृश्यते । जे.सी. क्याटफोर्डविदुषा प्रस्तुते सिद्धान्ते स्वकीयामसम्मतिं दर्शयन् स स्रोतोभाषालक्ष्यभाषयोर्मिथः साम्यमेवानुवादस्य प्रमुखाधार इति धारणां प्रस्तौति । (Naida, 1964:7)

तेनानुवादप्रक्रियायाः त्रीणि चरणानि यथा प्रस्तुतानि सन्ति -




१ = मूलभाषायाः सङ्घट्टनस्तरीयः विश्लेषितश्च पाठः

२ = लक्ष्यभाषायां सङ्क्रान्तः गहनः स्तरीयश्च पाठः

नाइडामते प्रथमचरणस्य पाठविश्लेषणे सङ्कथनस्य विश्लेषणं क्रियते । तादृशं विश्लेषणं व्याकरणाधारितमर्थाधारितञ्च भवति । व्याकरणविश्लेषणे सङ्कथनस्य व्याकरणपक्षा विश्लिष्यन्ते । अर्थविश्लेषणे तु सङ्कथनस्य प्राकरणिक-लाक्षणिक-व्यङ्ग्यार्थानामर्थविश्लेषणं क्रियते, विश्लेषणोत्पन्नपरिणामा लक्ष्यभाषायां नीयन्ते। एषोऽनुवादप्रक्रियायाः प्रमुखश्चरणः । एतादृशी प्रक्रिया मौखिकी लिखिता वा भवितुं शक्नोति । चरणेऽस्मिन्नर्थसंयोजने संरचनाया निर्माणे च समस्या कदाचित् समायाति । अनुवादकः ताः समस्याः निराकर्तुं प्रयतते । अनुवादप्रक्रियायास्तृतीयश्चरणः पुनः सङ्घट्टनमस्ति । एष पुनरुत्पादनमिति च कथ्यते । चरणेऽस्मिन् स्रोतोभाषायाः सङ्कथनं लक्ष्यभाषानुकूलतया निर्मीयते । तत्र स्रोतोभाषायाः सङ्कथनविश्लेषणेन स्थानान्तरेण च लक्ष्यभाषानुरूपसंरचनायां नीयते । अतश्चरणोऽयमनुवादस्यान्तिमश्चरणः मन्यते । नाइडाविदुषोऽनुवादसंबद्धाः प्रमुखा मान्यता यथा सन्ति -

१) अनुवादे भाषाया बाह्यसंरचनातोऽप्यन्तःसंरचनाया भूमिका विशिष्टा भवति ।


२) अनुवादको लक्ष्यभाषायाः स्वाभाविकतामनुकरोति, तदनुकूलश्च भवति ।

३) अनुवादेन भाषाया बाह्यसंरचनाया द्वितीयभाषायां रूपान्तरणं न सम्भवति ।

४) अनुवादः सङ्कथनाधारितः लक्ष्यभाषाकेन्द्रितश्च भवति । साहित्यानुवादे तस्याधिकः प्रभावो दृश्यते ।

## पिटर न्युमार्कविदुषोऽनुवादसम्बद्धा मान्यता

एतस्यानुवादसम्बद्धा मान्यता रोमन याकोब्सनविदुषः प्रकार्यात्मकभाषिकाध्ययनात् प्रभाविता लभ्यते । अस्यां मान्यतायां कारकव्याकरण-सङ्कथनविश्लेषण-घटकीयविश्लेषणादयः भाषाविज्ञानस्यानेके शाखाः प्रयुक्ताः सन्ति (अधिकारी, २०७७, पृ. ६१) नाइडानिर्दिष्टसङ्कथनबोधनप्रक्रियातः न्युमार्कप्रस्तुता बोधनप्रक्रिया विस्तृता लभ्यते । एतेनानुवादपद्धतौ बोधनप्रक्रियायाः पश्चादभिव्यक्तीकरणप्रक्रिया, पुनःसर्जनक्रिया वा योजितास्ति । स सङ्कथनस्य स्तरे गत्वा सान्दर्भिकार्थस्याऽनुवादो भवतीति कथयति । एष विद्वान् सङ्कथनस्य प्रकार्यश्रेणीभेदेन द्वौ भेदौ च दर्शयति (Newmark, 1998 : 5-12)




स्पष्टीकरणम् ,

१) साहित्यिकानुवादोऽभिव्यक्तिपरको विषयगतस्तरसम्बद्धो भवति ।

२) प्राविधिकानुवादः सूचनामूलकः प्रसङ्गतस्तरेण सह सम्बद्धो भवति ।

३) विज्ञापनस्यानुवादः सम्प्रेषणात्मको भवति । अतः स पूर्णतः प्रसङ्गगतस्तरेणांशतः पाठगतस्तरेण सम्बद्धो भवति ।

तथैव न्युमार्कविदुषा पुनरुत्पादनप्रक्रियायां विहिता प्रतिशब्दानुवादस्य चर्चा महत्त्वपूर्णा विद्यते। पाठस्य कतिपयस्तरे प्रतिशब्दानुवादोऽपेक्षितः स्वीकार्यश्च भवति । (भैसारे, २००७-८, पृ. १२)




मूलबद्धोऽनुवादः स्रोतोभाषायाः पक्षं द्रढयति चेत् मूलभूतोऽनुवादः लक्ष्यभाषायाः पक्षं द्रढयति । समग्रतो न्युमार्कविदुषः प्रमुखा मान्यता यथा दर्शयितुं शक्यन्ते (Newmark, 1998 : 5-12) -

१) अनुवादकः स्रोतोभाषायाः मूलसङ्कथननिकटे लक्ष्यभाषायाः सङ्कथनं नेतुमिच्छति ।

२) अनुवादकेन स्रोतोभाषायाः पाठकेषु यः प्रभावः, स प्रभावः लक्ष्यभाषायाः पाठकेष्वपि उत्पादनीयः ।

३) अर्थतात्त्विकोऽनुवादः स्रोतोभाषापक्षधरश्चेत् सम्प्रेषणात्मकोऽनुवादः लक्ष्यभाषापक्षधरः दृश्यते ।

४) प्रक्रियापद्धतित्वादनुवादः वास्तविकानुवादस्य कृते भिन्नानां सङ्कथनानां स्तरे प्राप्नोति तस्मादेव सान्दर्भिकप्रासङ्गिकावर्थावनूद्येते ।

## अनुवादस्य समस्या

अनुवादसिद्धान्तानुसारमनुवादः जटिलो मन्यते । वस्तुतोऽनुवादः जटिलमात्रं न स तु जटिलतमः । भाषायाः वास्तविकोऽनुवादो भवितुं न शक्नोति तथाऽप्यनुवादमादर्शानुवादस्य निकटे नेतुं शक्यते। अनुवादकार्यं समस्यामुक्तं नास्ति। स्रोतोभाषायाः संरचनां भावञ्चानूद्य लक्ष्यभाषायां प्रस्तुतौ वास्तविकस्यादर्शानुवादस्य निकटे गमयितुं यत्नः क्रियत एव, परन्तु सर्वोच्चस्थानं प्राप्तुं न शक्यते । तत्रापि विशेषतः साहित्यस्य, साहित्येऽपि कवितायास्तु वास्तविकोऽनुवादो भवितुमेव न शक्नोतीति मन्यते ।

प्रत्येकभाषाया भौगोलिक-सामाजिक-सांस्कृतिक-पारिस्थितिकादिपरिवेशो पृथग् भवति । सर्वासां भाषाणां व्याकरणार्थव्यवस्थे भिन्ने स्तः । भाषायामवस्थिता व्यङ्ग्याः, सूक्तयः, लौकिकसाहित्यसन्दर्भाश्चानुवादे समस्याजनका भवन्ति । भाषायाः संरचनाभेदेन, समाजसंस्कृत्योः कारणेन चानुवादे सारल्यं जाटिल्यं वा भवति । अनुवादचिन्तकेन क्याटफोर्डविदुषा भाषायाः समाजसंस्कृत्योः कारणेनानुवादे समस्याः जायन्ते इति कथितमस्ति । स्रोतोलक्ष्ययोर्द्वयोर्भाषयोर्विशेषज्ञः प्रविधिकुशलोऽप्यनुवादकः स्वकीयशक्त्या सामर्थ्येन च भाषान्तरणे पूर्णतः समर्थो न भवति । एषा स्थितिरनुवादस्य सीमा कथ्यते । द्वयोर्भाषयोर्मिथः साम्यं विद्यते चेदनुवादसमतुल्यता कथ्यते । तयोर्यत् वैषम्यं तदनुवादान्तरालः कथ्यते । (अधिकारी, २०७७, पृ. १०७-१२८) भाषिकसंरचनया सामाजिक-सांस्कृतिकभेदेन इव पाठस्य

प्रकृत्यनुसारेणाऽप्यनुवादे समस्याः सम्भवन्ति । अनेन प्रकारेणानुवादस्य तिस्रः सीमा भवन्ति । ता यथा सन्ति (क) भाषिकी सीमा, (ख) सामाजिकसांस्कृतिकी सीमा, (ग) पाठस्य प्रकृत्याधारिता सीमा चेति (शर्मा, २०१३, पृ. ४९) ।

**भाषिकी सीमा**

प्रत्येकभाषाया व्याकरणव्यवस्था, अर्थव्यवस्था च भिन्ना भवति । भाषिकसंरचनायाः पार्थक्येनानुवादकार्ये सौकर्यं जाटिल्यञ्च जायते । द्वयोर्भाषयोर्व्याकरणे, संरचनायाम्, अर्थव्यवस्थायाञ्च यावत् साम्यं तावदनुवादे सारल्यम्, वैषम्येऽपि समानताया मात्रा यावदल्पा भवति तावदेवानुवादकार्ये काठिन्यमुत्पद्यते । स्रोतोभाषाया वाक्येषु सूक्ष्मोऽर्थो सन्निहितो भवति । तस्य लक्ष्यभाषायामनुवादो न सम्भवति । स्रोतोभाषायां काचिदवस्थासूचिका भाषिकावस्थितिरेतादृशी भवति तस्याः भाषान्तरणाय लक्ष्यभाषायां पर्यायशब्दा न लभ्यन्ते । सा भाषिकावस्थितिर्यथा - १) श्लिष्टाभिव्यक्तिः २) विशिष्टव्याकरणिकसन्दर्भे प्रयुक्ताश्शब्दाः ३) सन्दर्भबोधकनामशब्दाः ४) भाषिकशैल्याधारितो भेदश्चेति (शर्मा, २०१३, पृ. ५०) ।

**श्लिष्टाभिव्यक्तिः**

सर्वासु भाषासु श्लिष्टाश्शब्दा भवन्ति । स्रोतोभाषायामिवानेकार्थबोधकाः श्लिष्टशब्दाः लक्ष्यभाषायां न सम्भवन्ति । तेनानुवादे जाटिल्यमुत्पद्यते । संस्कृतभाषायाः दुर्गालङ्घितविग्रहः, ब्रह्मवित्तापहारी, सद्वेषा, सखरः, कालादीनां श्लिष्टशब्दानां पर्यायपदानि नेपाल्यादिषु संस्कृतेतरभाषासु न लभ्यन्ते । अतः श्लिष्टशैलीयुक्तानां कादम्बरी-नलचम्पूस-दृशानां काव्यानामनुवादे मूलरचनायाः काव्यसौन्दर्यं यथावत् संस्थाप्य भाषान्तरणमसम्भवमेव भवति ।

**विशिष्टव्याकरणिकसन्दर्भे प्रयुक्तशब्दाः**

कतिपयभाषासु केचिदेतादृशाः शव्दाः भवन्ति ते विशिष्टव्याकरणिकसन्दर्भे प्रयुज्यन्ते । लिङ्गवचनादीना-माधारेण तेषां सूक्ष्मोऽर्थो भवति । तस्य भाषान्तरे रूपान्तरणं न सम्भवति । संस्कृते मित्रशव्दः पुलिङ्गे सूर्यं बोधयति चेत् नपुंसके सुहृदं बोधयति । तथैव आम्रशब्दः वृक्षं फलञ्च बोधयति । बहुवचनप्रयोगेणादरः सूच्यते । एतादृश्या व्याकरणिकपक्षघटिताया विशिष्टतायाः रूपान्तरणं कठिनं भवति ।

**सन्दर्भबोधका नामशब्दाः**

भाषायां सांस्कृतिकैतिहासिकादिसन्दर्भज्ञापकाः शब्दा लभ्यन्ते । तेषां पर्यायपदानि भिन्नसांस्कृतिकैतिहा-सिकस्थले प्रयुज्यमानासु भाषासु नोपलभ्यन्ते । तेन तादृशानां शव्दानां भाषान्तरणं जटिलं भवति । संस्कृतभाषायाः हनुमान् (परप्रेरितकार्यकर्ता), विभीषणः (कुलभेदकः), मन्थाचलः (मर्मवेत्ता), नृसिंह (विष्णोरवतारविशेषः) इत्यादीनां शब्दानां फ्रेन्चाङ्गल-जापानी-कोरियनादिवैदेशिकभाषासु रूपान्तरणं कठिनं भवति ।

**भाषिकशैल्याधारितो भेदः**

सर्वासु भाषासु स्वकीयस्वकीयशैल्याधारितो भेदो भवति । एष भाषिकभेदो जनानां व्यक्तिगताभिव्यक्तौ सामाजिकपरिस्थितौ चाधारितो भवति । आञ्चलिकशब्दा मूलभाषायां प्रयुक्ताः सन्तः पूर्ववत् प्रभावं न जनयन्ति । नेपाल्याः पूर्वेलि-पछिमा-ओरपछिमा-मझपछिमादिभाषिकायां विविधोपभाषिकायाञ्च प्रयुक्तानां शब्दानां मानकनेपाल्यां संस्कृते वा रूपान्तरणकार्यं दुष्करं भवति ।

**सामाजिकसांस्कृतिकी सीमा**

भाषाया निर्माणे, उपयोगे, संरक्षणे च समाजस्य भूमिका भवति । भाषायां समाजस्य संस्कृतेश्च सूक्ष्मस्वरूपं सन्निहितं भवति । भाषासंस्कृत्योः भाषासमाजयोश्चाभेद्यः सम्बन्धो दृश्यते । तत्र पारिवारिकसामाजिकसंरचनायाः सम्बन्धस्य च बोधकाश्शब्दा भवन्ति । द्वयोर्भाषयोः सामाजिकसांस्कृतिकी स्थितिः समाना विद्यते चेत् भाषान्तरणं सरलं भवति, यदि सा भिन्नास्ति चेदनुवादे जाटिल्यमनुभूयते । पारिवारिकसम्बन्धस्य सामाजिकसंरचनायाश्च बोधकानां पितृव्याग्रजानुज-सतीर्थ्य-दायाद-पितामह-प्रपितामहादीनां संस्कृतशब्दानां भिन्नपारिवारिकसांस्कृतिकसंरचनायुक्ते स्थले प्रयुक्तासु फ्रेन्चाङ्गल-रसियन-कोरियन-जर्मनादिषु भाषान्तरणं जटिलं भवति । तथैव सिन्दूरार्पणम्, कलशः, सप्तपदी, अभिषेकादीनां

सामाजिकसन्दर्भयुक्तानां शब्दानाञ्च भिन्नसांस्कृतिकस्थले प्रयुज्यमानभाषासु भाषान्तरणे काठिन्यमनुभूयते । आङ्गले रोटिका, अवलेहः, मालपूपादयः आहारक्रियासम्बद्धाः संस्कृतशब्दाः, तथैव संस्कृते स्यान्डविज-वर्गर-पिज्जा-केकादय आङ्गलशब्दाः रूपान्तरिताः न भवन्ति । गङ्गास्नानम्, कुम्भस्नानम्, मकरस्नानादीनां सांस्कृतिकसन्दर्भो भाषान्तरे पर्यायान्वेषणेन ज्ञाप्यो न भवति । शिवरात्रिः, दीपावलिः, रक्षाबन्धनादयः पर्वबोधकाः शब्दाश्चानुवादस्य सांस्कृतिकसीमां द्योतयन्ति ।

**पाठस्य प्रकृत्याधारिता सीमा**

अनुवादस्यानेकक्षेत्राणि सन्ति । प्रशासन-साहित्य-विधि-कृषि-विज्ञानप्रविधि-चिकित्सा-खेल-सञ्चारप्रविधि-वाणिज्यादिषु कार्यक्षेत्रेषु विषयक्षेत्रेषु वा प्रयुक्ताया भाषायाः संरचना भिन्ना भवति । विज्ञानप्रविधिचिकित्साक्षेत्रे नवीनशब्दा लभ्यन्ते । अनुवादे विविधक्षेत्रीयभाषायाः संरचनायां विशेषा दृष्टिर्दातव्या भवति । कवितानाटकोपन्यासादीनां काव्यभेदानां बाह्यस्वरूपेण सहान्तःप्रवृत्तेश्च विषये सावधानतया रूपान्तरणं कर्तव्यं भवति । काव्यस्यालौकिकत्वं वैशिष्ट्यञ्चानुवादे प्रायशोऽदृश्यं भवति । काव्यानुवादे व्यङ्ग्यालङ्काररीतिच्छन्दआदीनाम्, नाट्यसंवादयोजनाया, नाटकीयतायाश्चानुवादः स्वकीयां सीमां दर्शयति ।

## निष्कर्षः

स्रोतोभाषायां स्थितानां पाठानां सामग्रीणां वा लक्ष्यभाषायां रूपान्तरणस्य प्रक्रिया कार्यं वा अनुवादः । अनुवादो भाषिकी प्रक्रिया विद्यते । तस्या विविधाः पद्धतयो विधयश्च सन्ति । एष भाषान्तरिकः, अन्तरभाषिकः, भाषेतरश्च भवति । तथाऽपि भाषान्तरिकस्वरूपमेवानुवादस्य मूलस्वरूपमस्ति । एतस्य प्रकारा अनुवादस्य समग्रस्वरूपाभिव्यञ्जनं कुर्वन्ति । विविधैरनुवादचिन्तकैः प्रस्तुता मान्यताः, लक्षणानि, पद्धत्यादयोऽनुवादस्य सैद्धान्तिकस्वरूपं स्फुटीकुर्वन्ति । आदर्शानुवादस्य कृते कुशलस्यादर्शानुवादकस्यावश्यकता भवति । तादृशेऽनुवादके स्रोतोलक्ष्यभाषयोर्ज्ञानम्, सङ्कथनस्य पूर्णज्ञानम्, सामाजिकसांस्कृतिकभाषिकपरिस्थितेर्भेदज्ञानम्, विविधकोशानां पारिभाषिकशब्दसमूहानाञ्च ज्ञानम्, कारयित्री प्रतिभा चेति गुणानां स्थितिरावश्यकी । एतादृशोऽनुवादक आदर्शानुवादस्य निकटे प्राप्तुं शक्नोति । अनुवादपद्धतिषु स्रोतोभाषायाः सङ्कथनपठनम्, तस्य भाषान्तरिकविश्लेषणम्, अनुवादस्य प्रक्रिया, सङ्घट्टनं वा, लक्ष्यभाषायां सङ्कथननिर्माणञ्चेति चरणानि भवन्ति । एतानि चरणानि सम्पाद्य प्रमुखतया भाषावैज्ञानिक-सांस्कृतिक-सौन्दर्यपरकपद्धतीरवलम्ब्य क्रियतेऽनुवादः ।

अनुवादो भाषायाः प्रायोगिकं कार्यमस्ति । प्रकार्यपरकत्वादियं प्रक्रियाऽपि कथ्यते । एतस्मिन्नेवाधारे प्रायोगिकभाषाविज्ञानस्य महत्त्वपूर्णा शाखा विद्यतेऽनुवादविज्ञानमनुवादाध्ययनं वा । भाषाशिक्षणकार्येण प्रयोजनेन च सह सम्बद्धत्वादनुवादो भाषशिक्षणे च प्रयुज्यते । मातृभाषाभिन्नकक्षाशिक्षणे व्याकरणानुवादशिक्षणे चाधिकप्रयुक्तो दृश्यते । वैदेशिकभाषाया विविधप्रशिक्षणप्रदायिकायाः सर्वकारीयनिजात्मकसंस्थायाः, वैदेशिकभाषाध्यापकानां विश्वविद्यालयानां विद्यापीठानां महाविद्यालयानां वा अनुवादस्य शैक्षणिकं प्रयोजनं महत्त्वञ्च सर्वोत्कर्षेण वर्तते । अधुना प्राविधिकोन्नतेः कारणादनुवादस्य सञ्चारसूचनाप्रविधौ च महत्त्वं वर्धमानं दृश्यते । यान्त्रिकानुवादोऽपि क्रमेण व्यापकतां प्राप्नुवन्नस्ति । अनुवादस्येयं परम्परा यदि न स्यात् संसारस्य ज्ञानराशिः तत्तत्स्थाने सीमिता भवति स्म । तया विश्वव्यापकः प्रभावः न सम्भवति स्म । अनुवादो भाषिकसम्पन्नतायाः प्रतीको वर्तते । यस्य राष्ट्रस्य वाङ्मयं विश्वव्याप्तं भवति तस्य राष्ट्रस्य भाषा सम्पन्ना भवति । अनुवादो भाषाणां मिथो ज्ञानादानप्रदानस्य सर्वोत्कृष्टं सशक्तञ्च साधनमस्ति ।

## सन्दर्भसूची

अधिकारी, बलराम (२०७७), *अनुवाद सिद्धान्त,* काठमाडौं : नेपाल प्रज्ञा प्रतिष्ठान ।

गौतम, लक्ष्मणप्रसाद (सन्. २०१८-१९), "अनुवादको सैद्धान्तिक स्वरूप", *प्रवासन,* वर्ष २, अङ्क २ बेलायत : समकालीन साहित्य प्रतिष्ठान (पृ. १-१६) ।

तिवारी, भोलानाथ (सन्. १९७२), *अनुवादविज्ञान,* दिल्ली : शब्दकार प्रकाशन ।

दीक्षित, दिनेश चन्द्र (सन्. २०१९), "काव्यानुवाद : प्रक्रिया समस्याएँ और सम्भावनाएँ", *भाषा,* वर्ष ५८, अङ्क ३ (२८४), दिल्ली : केन्द्रीय हिन्दी निर्देशनालय (पृ. १४५-१५२) ।

पाटिल, भारत वापुराव (सन्. २००८-९), *आर्. के. नारायण के अंग्रेजी उपन्यास 'दि गाइड' के हिंदी अनुवादों का तुलनात्मक अनुशीलन* (अप्रकाशित पीएच्डी शोधपत्र), वर्धा : अनुवाद प्रौद्योगिकी विभाग, अनुवाद एवं निर्वचन विद्यापीठ, महात्मा गांधी अन्तरराष्ट्रिय हिंदी विश्वविद्यालय ।

भैसारे, कल्याणी पंजाबराव (सन्. २००७-८), *नवम दशक की मराठी दलित आत्मकथाओं का हिंदी अनुवाद मूल्याङ्कन* (अप्रकाशित पीएच्डी शोधपत्र) वर्धा : अनुवाद प्रौद्योगिकी विभाग, अनुवाद एवं निर्वचन विद्यापीठ, महात्मा गांधी अन्तरराष्ट्रिय हिंदी विश्वविद्यालय ।

शर्मा, राजमणि (सन्. २०१३) *अनुवाद विज्ञान : सिद्धांत एवं प्रयोग*, पंचकूला : हरियाणा ग्रंथ अकादमी ।

Catford, J.C. (1965). *A Linguistic Theory of Translation*. Walton Street : Oxford University Prees.

Jakobson, Roman (1959). (8-6-2021). *On Linguistic Aspects of Translation*. https://www.stanford.edu/jakobson.pdf.

Newmark, Peter (1998). *A Text Book of Translation*. U.K. : Prentice all.

Nida, Eugene A. (1964). *Toward A Science of Translating*. Leiden : E.J. Brill.